International Journal of Sanskrit Research 2024; 10(2): 37-38

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(2): 37-38
© 2024 IJSR
www.anantaajournal.com
Received: 02-01-2024
Accepted: 08-02-2024

**सुचित्रा साहु**
अनुसंधात्री, राष्ट्रीय संस्कृत विद्यापीठ,
तिरुपति, आंध्र प्रदेश, भारत

**Corresponding Author:**
**सुचित्रा साहु**
अनुसंधात्री, राष्ट्रीय संस्कृत विद्यापीठ,
तिरुपति, आंध्र प्रदेश, भारत

# अपराजितवधूमहाकाव्यप्रणेतुः पूर्णचन्द्रशास्त्रीणः काव्यरचना वैचित्र्यम्

**सुचित्रा साहु**

## सारांश

सत्वरजस्तमोभिस्त्रिगुणैः प्रतायमानेऽमुष्मिन् मायाप्रपञ्चे निमज्जतां प्राणिनां त्रितापसन्तापनाशाय चतुर्वर्गपुरुषार्थसम्प्राप्तये काव्यकलाकलिकारसपेपीयमानाः कविप्रवरा मधुव्रता इव प्रतिभान्ति । संस्कृतकाव्यानि वैदिकसाहित्यं पुराणं रामायणमुपजीव्य समुपन्यस्तानि । वेदेषु वर्णितानामाख्यायिकानामाधारेण कवयः लौकिककाव्यप्रणयने प्रयासं समाश्रयन्ति । कालिदासस्य विक्रमोर्वंशीयकाव्ये वेदवर्णिता उर्वशीपुरुरवसुप्रणयकथा संलक्ष्यते । संस्कृतभाषाकवयः तादृशीं प्रणयकथां शिरसि निधाय मेघदूते कालादासः भृत्ययक्षस्य प्रणयकथां प्रतिपादितवान् , तथैव भासोऽपि दरिद्रचारुदत्ते – दरिद्राश्रयकथां प्रकटितवान् ।कविः शुद्रकोऽपि मृच्छकटिके दरिद्रचरितं महनीयशैल्या समुपस्थापितवान् । आदिकविः वाल्मीकिनापि स्वप्रणीतरामायणे करुणरसस्य प्रवाहमुपपादितवान्। रस प्राकर्ष्यमपि कविश्रेष्ठश्रीहर्षः समाश्रितवान् । संस्कृतकाव्यस्रोतसि ये विद्वांसः काव्यप्रणेतार आसन् तेषां मध्ये भास – कालिदास – अश्वधोष – माघ – दण्डी – क्षेमेन्द्र – श्रीहर्षप्रभृतयः प्राथम्यं भजन्ते । तत्र संस्कृतकाव्यजगति काव्यस्य महिमा -गरिमा मधुरिमा विपश्चितां समादृतत्वात् काव्यमित्युक्ते "कवेः कर्म काव्यम्" । शब्दार्थयोः रसालंकारसहितं यथार्थप्राकर्ष्यमनुभूयते। तदेव काव्यत्वेन अभिधीयते । काव्यसौन्दर्यसम्बन्धे आनन्दवर्धनः कथयति –

रसक्षिप्ततया यस्य वन्धः शक्यक्रियो भवेत् ।
अपृथज्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनौ मतः ।।१।।

**१. ध्वन्यालोकः**

संस्कृतसाहित्ये A Berriedale Keith महोदयः The Heritage of India Series ग्रन्थे कथयति – We have seen that classical Sanskrit has its root in the epic ,and that the incidental hints in patanjali are sufficient to show that the kavya was already practised in his day .The metre of the later kavya bears testimony to the same fact ; it is essentially a hardening and stereotyping of the forms which the epic presents in the process of development [१]

ड. श्रीपूर्णचन्द्रशास्त्रिणा प्रणीतमपराजितवधूनामकं दशसर्गात्मकं वृत्तकाव्यं सामाजिकचित्रणपूरितं राराजते । अत्र विषयविन्यासदृष्ट्या यथा चमत्कारिता दृश्यते तथैव रसालंकाराणामपि सन्निवेशः सुविन्यस्तः ।

**कूटशब्दाः** नारीचरित्रम्, समाजव्यवस्था, आध्यात्मिकजीवनम्, निरपेक्षता

## प्रस्तावना

संस्कृतसाहित्यसेवकेषु सत्सु वहुषु डा. पुर्णचन्द्रशास्त्रीपादाः स्वकाव्यकलानैपुण्यमाश्रित्य सहृदयहृदयेषु सुप्रशस्य आसीत् । १९२७ शताब्दां अक्टोवर दशमदिनाङ्के राजस्थानप्रदेशे डा. पूर्णचन्द्रशास्त्री अजायत । उत्तरप्रदेशस्य मुलनिवासिरामेश्वरदत्तस्य सः ज्योष्ठपुत्र आसीत् । स्वभाग्यात् राजस्थान् – दील्ली – वनारसहिन्दुसंस्कृतविश्वविद्यालयेषु स्वशिक्षां लब्धवान् । वाल्यकालात् पित्र एकादशवर्षवयसि तस्य विवाहः संपादितः । १९५०शताब्द्यां राजस्थानात् उत्कलप्रदेशमागत्य वरगडस्थानं स्वकर्मनिवासस्थानरूपेण चयनं कृतवान् । तस्यान्तकरणे विश्वभातृत्ववोधस्य तथा वसुधैवकुटुम्वकम् इति संहतिसमन्वयस्य भावना जागरिता आसीत् । संस्कृतसाहित्यक्षेत्रे शास्त्रीमोहदयेन ससम्मानमनेकानि मानपत्राणि गौरवपुर्वकं लव्धानि । २००३ शताब्द्यां "उत्कल संस्कृत एकादेमी" पक्षतः सम्बर्धनं लब्धवान् । अस्मिन्नेव सम्वत्सरे "राज्यस्तरीयलेखकसम्मिलनी" एनं महान्तं लेखकं "चलापथः" सम्मानद्वारा विभूषितवान् । हिन्दीसभापक्षतश्च "रत्न" सम्मानेन एषः मण्डित आसीत् । २००५ द्वादशदिनाङ्के "अखिलभारतीय-

**१. The heritage of India series (classical Sanskrit literature)**

ब्राह्मणसम्मीलने" एषः ब्राह्मणशिरोमणि उपाधिं लब्धवान् । "अपराजितवधू" पुस्तकनिमित्तं वरगडसंस्कृतभारतीपक्षतः शास्त्रीमोहदया २००७शताब्द्यां मानपत्रमुपायनञ्चं प्राप्तवान् । एवं रीत्या वहुत्र वहुभिः संगठनैः शास्त्रीमहाभागानां कृते वहुमानं प्रदत्तमासीत् । तेषां सामाजिकः जीवनचर्यायाश्च प्रामुख्यमासीत् । तस्मात् भूतपूर्वप्रधानमन्त्री अटलविहारीवाजपेयीत आरभ्य राममोनहरलोहिआ-जयप्रकाश - नारायण - उमाभारती - किशन्पट्टनायकप्रभृतिभिः सह तेषां वहुमूखीसम्बन्ध आसीत् । वरगडमध्येऽपि लोहिआविचारमञ्चस्य सभापतित्वं तेन संपादितम् । देशविदेशस्य अनुरागिणः वहवः विद्यानुरागिछात्रा अपराजितावधू-महाकाव्योपरि वैदुष्यपुर्ण प्रबन्धं लिखितवन्तः। राजस्थानस्य कोटाविश्वविद्यालयस्य वर्षा जैन राजस्थानविश्वविद्यालयस्य प्रो. सुबाषचन्द्रः साहेव तथा हरियाणा कुरुक्षेत्रविश्वविद्यालयस्य कश्चिदध्यापकः डा.शास्त्रीसम्बन्धे प्रबन्धं लिखितवन्त । डा. शास्त्री वृत्या आयुर्वेदचिकित्सक आसीत् । तस्य सम्बन्धः संस्कृतभाषा-साहित्येन सार्धं सहृदमासीत् । २००० शताब्द्यां अपराजितवधूमदाकाव्यस्य प्रकाशनं जातम् यत्र सप्तशतश्लोकाः विद्यन्ते तथा चकाव्यमेतत् दशसर्गे उपलब्धम् । एतत् सहितमन्यत् पुस्तकचतुष्टयमपि शास्त्रीमोहदयेन विरचितम् । यथा-प्रवृद्धभारतम्, अन्तर्व्यथा , दुर्भिक्षम् त्रिविधमिति ।

एतेषु पञ्चषु अपराजितवधूमहाकाव्यं तथा प्रवृद्धभारतमिति द्वयं प्रकाशितम् ।

**अपराजितवधूमहाकाव्यस्य वैचित्र्यम् -**

डा. पूर्णचन्द्रशास्त्रीमहोदयप्रणीत अपराजितवधूमहाकाव्यस्य वैचित्र्यं वहुधा दृश्यते । कस्यचित् काव्यस्य मूल्याङ्कनं चेत् विपरीतं भवति तर्हि कवेर्भाव अन्यथा जायते । परन्तु कविः स्व महनीयं नम्रभावं प्रदर्शयति यथा -

यदि भवति समीक्षामर्षनिन्दार्थयुक्ता
प्रचलितविधिमानैः काव्यशास्त्रार्थविद्भिः।
हृदयगतविषादोल्लेखनस्यापराध -
मवनषिरसाऽहं सर्वथा स्वीकरोमि ।।१।।

अत्र अयमाशय काव्यशास्त्रस्य स्वरूपं यत् समीक्षा निन्दात्मिका भवति तर्हि नैराश्यं ये प्रदर्शयन्ति तद् प्रदर्शननिमित्तं नम्र तथा कविः स्वकीय वैगुण्यं स्वीकरोति। काव्यस्य प्रतिछत्रं जातिधर्मनिर्विशेषेण आदर्शं शिक्षादीक्षां संस्कारं च कविः भृशं प्रतिपादयति ।
कविना काव्यस्य अन्तराले वर्णनाछलेन करुणरसं समुद्धातयन् लिखन्ति -

अहरहो बहुतापमयं ददौ पुरुषयन्त्रितदुःखभरो भवः।
शरशतन्त्वबलाजनुरर्पितं मनुजदम्भकृते तु हविष्यवत् ।।२।।

दुर्भिक्षोऽभूत्कालपाशानुयतो भोज्याभावे जीवरक्षा कथं स्यात्।
हाहाकारो व्यापृतः सर्वदिक्षु चिन्तन्त्येते ग्रामजाः किन्नु कार्यम् ।।३।।

अत्र श्लोकाभ्यां संसारप्रपञ्चे पुरुषनियन्त्रित समाजः दुर्वलं नारीं प्रति वहुयन्त्रणां दत्तवान् । वहव्यः स्त्रियः सन्तापसहनाय अहंकारिपुरुषाणां कृते समर्पिताः तथैव कवेर्भाषया पुरुषाणां मनः कौटिल्यपूर्णं तथा निरन्तरं नार्याः शोषणनिमित्तं समुदिष्टम्।
वास्तवसत्यचित्रणाय कविः कथयति -

पुत्रोत्पत्तिः कामनायाश्च तृप्तिर्ह्यन्ये कार्ये वर्तते नाधिकारः ।
स्वेछाचारो चोषितामेव निन्द्यः पुंसां हेतोर्नो निषेधश्च कोऽपि ।।४।।

अत्र स्त्रीणांमुपयोगः द्विविधः भवति । एकन्तु सन्तानोत्पत्तिः अपरन्तु कामाचार पूरणम् । ताषां स्वेच्छाचारः नितरां निन्दनीयः । सामाजिकदृष्ट्वा नीतिवैषम्यं

१.अ.व.म-१.५ २.अ.व.म-१.१६
३.अ.व.म-१.१९ ४.अ.व.म-१.५९

**कविः स्पष्टं निन्दति तथा**

यदि धवानुमृता प्रथिता सती भवति साधु सतीषु सुपूजिता ।
जगति दारावियोग उपस्थिते किमिह नानुसरन्ति तथा नराः ।।१।।

अत्र इदं तात्पर्यं यत् यदि पतिमरणात् परं स्त्रियाः मरणेन स्त्री सती भवति तर्हि स्त्रीमरणात् परं पतिरपि मरणं वरयित्वा कथं सत्यवान् न भवेत् । एतदेव समाजस्य पक्षपातः विचारः ।
एवं रीत्या काव्यस्य प्रतिपदं शब्दाडम्वरः - सामाजिकचित्रणम् - रसालङ्कारवर्णनप्रभृतिः काव्यस्य वैचित्र्यं विभूषयति ।

**उपसंहारः**

संस्कृतवाङ्कमये नैकानि काव्यानि , नैके ग्रन्थाः , नैकानि शास्त्राणि च वर्तन्ते । ज्ञानं विज्ञानञ्च अत्र अतीव प्राचीनं भवति । कस्यापि विषयस्य परिशीलनं नूतनमिति कथनेन कुत्रचित् मनसि प्रश्नः उपजायते ।

**उच्यते च शास्त्रकारैः**

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमा ।
वचोविन्यासवैचित्र्यं मात्रमत्र विचार्यताम् ।।

किन्तु साहित्यक्षेत्रे सौन्दर्भतृप्तेः कदाऽपि समाप्तिः नैव भवति । यावत्सौन्दर्यं पश्यामस्तावत् तत्र नुतनता एव परिस्फुरति। ध्वन्यालोककारआनन्दवर्धनाचार्योऽपि लिखति -

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिरहात् ।
सर्वे नव इवाभान्ति मधुमास इव द्रुमाः ।।२।।

१.अ.व.म-२.२६ २.ध्वन्यालकः

**काव्यगतकवित्वकला संक्षेपेण एवं लक्ष्यते**

1. अपराजितवधूमहाकाव्यस्य अलंकारशास्त्रदृष्ट्या समीक्षणम् ।
2. अपराजितवधूमहाकाव्ये समाजप्रताडितनारीणां परिशीलनम् ।
3. अपराजितवधूमहाकाव्ये सामाजिकमूल्यबोधानां परिशीलनम् ।
4. अपराजितवधूमहाकाव्ये कथानके आधुनिकघटनानां विषिकरणम् ।
5. अत अत्र अपराजितवधूमहाकाव्यस्य सौन्दर्यशास्त्रदृष्ट्या सामाजिकदृष्ट्या च परिशीलनं काव्यस्यास्य वैशिष्ट्यमुद्भावयिष्यति ।